In Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muthulakshmi Research Academ

Public domain. Digitization Muthulakshmi Research Acader

C.S.S.

॥ श्रीः ॥

॥ ओन्नमः परमात्मने ॥

॥ श्रीरुद्रप्रश्नः, सस्वरः ॥

सस्वर चमक, पुरुषसूक्त, शान्तिपञ्चक, श्रीसूक्त,
भूसूक्त, दुर्गासूक्त, रुद्रकवचसहितः ।

T. M. नारायणशास्त्रिणा

परिशोधितः

मु. अ. वै. अनन्तरामशास्त्रिणा

कुम्भघोणस्थ स्वकीय

शारदाविलासमुद्रणालये

मुद्रापितः
कुम्भघोणे प्रकाशितश्च
विजयतेतमाम् ॥

1933.

(Copyright Registered.)

मूल्यम्] ——— [0—5—0.

Public domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Acader

॥ श्रीः ॥

॥ ओन्नमः परमात्मने ॥

॥ अथ रुद्रप्रश्नः ॥

अस्य श्रीरुद्रप्रश्नस्य अघोरऋषिः, अनुष्टुप्छन्दः, सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषस्सएष रुद्रो देवता।अग्निक्रतुचरमायामिष्टकायां शतरुद्रीयजपे विनियोगः । एका गायत्री छन्दः । तिस्रोऽनुष्टुभः । तिस्रः पङ्क्तयः । सप्तानुष्टुभः । द्वे जगत्यौ । श्रीसाम्बसदाशिवप्रीत्यर्थे शतरुद्रीयजपे विनियोगः । अग्निहोत्रात्मने अंगुष्ठाभ्यां नमः । दर्शपूर्णमासात्मने तर्जनीभ्यां नमः । चातुर्मास्यात्मने मध्यमाभ्यां नमः । निरूढपशुबन्धात्मने अनामिकाभ्यां नमः । ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः । सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः । अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्णमासात्मने शिरसे स्वाहा । चातुर्मास्यात्मने शिखायै वषट् । निरूढपशुबन्धात्मने कवचाय हुम् ।

Public domain. Digitization Muthulakshmi Research Acade

ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

(ध्यानम्) आपाताळनभस्थलान्तभुवनब्रह्माण्ड-माविस्फुरज्ज्योतिस्स्फाटिकलिङ्गमौळि विलसत्पूर्णेन्दु-वान्तामृतैः । अस्तोकाप्लुत मेकमीश मनिशं रुद्रा-नुवाकान् जपन् ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रो-ऽभिषिञ्चेच्छिवम् ॥१॥ ब्रह्माण्डव्याप्तदेहा भसितहिम-रुचा भासमाना भुजङ्गैः कण्ठेकालाः कपर्दाकलित शशिकला श्चण्डकोदण्डहस्ताः । त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाश्शाम्भवा मूर्तिभेदा रुद्राः श्रीरुद्रसू-क्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥२॥

शन्नो मेमयस्कश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे सौ-मनसश्च मे भद्रञ्च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणञ्च मे यन्ताचं मे धर्ताचं मे क्षेमश्च मे धृतिश्च मे वि-श्वञ्च [१] मे महश्च मे सँविच्च मे ज्ञात्रञ्च मे सूश्च मे प्रसू-श्च मे सीरञ्च मे लयश्च म ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मे

Public domain. Digitization Muthulakshmi Research Acader

ऽनामयच्चमे जीवातुश्चमे दीर्घायुत्वꣳ मेऽनमित्रञ्चमेऽ
भयञ्चमे सुगꣳ मे शयनञ्चमे सूषाचंमे सुदिनंञ्चमे ॥ [२]

ओं शान्तिश्शान्तिश्शान्तिः ॥

ओं नमो भगवते रुद्राय ॥

नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अ-
स्तु धन्वने बाहुभ्यां मुत ते नमः । या त इषुश्शिवतं-
मा शिवं बभूव ते धनुः । शिवा शर्व्या या तव तया
नो रुद्र मृडय । या ते रुद्र शिवा तनूरघोराऽपापका-
शिनी । तयानस्तनुवा शन्तमया गिरिशन्ताभि चा-
कशीहि । यामिषुङ्गिरिशन्त हस्ते [१] बिभर्ष्यस्तवे ।
शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः पुरुषञ्जगत् । शिवेन
वचसा त्वा गिरिशाच्छा वदामसि । यथा नस्सर्वमि-
ज्जगदयक्ष्मꣳ सुमना असत् । अध्यवोचदधिवक्ता
प्रथमो दैव्यो भिषक् । अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च
यातुधान्यः । असौ यस्ताम्रो अरुण उत बभ्रुस्सुमङ्ग-
लः । येचेमाꣳ रुद्रा अभितो दिक्षु [२] श्रितास्सह-
स्रशोऽवैषाꣳ हेडईमहे । असौ योऽवसर्पति नीलग्रीवो

Public domain. Digitization Muthulakshmi Research Acade

विलोहितः । उतैनङ्गोपा अदृश्र न्नदृशन्नुदहार्यः । उतै-
नँविश्वा भूतानि स दृष्टो मृडयाति नः । नमो अस्तु
नीलग्रीवाय सहस्राक्षायमीढुषे । अथो ये अस्य सत्वा-
नोऽहन्तेभ्योऽकरन्नमः । प्रमुञ्च धन्वन्त्वमुभयोरार्त्नि-
योर्ज्याम् । याश्च ते हस्त इषवः [३] परा ता भगवो
वप । अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य
शल्यानां मुखा शिवोनस्सुमना भव । विज्यन्धनुः
कपर्दिनो विशल्यो बाणवाꣳ उत । अनेशन्नस्येषव
आभुरस्य निषङ्गथिः । या ते हेतिर्मीढुष्टम हस्ते बभूव
ते धनुः । तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ।
नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्या-
मुत ते नमो बाहुभ्यान्तव धन्वने । परि ते धन्वनो
हेति रस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे
अस्मन्निधेहि तम् ॥ [४] हस्ते दिख्विषव उभाभ्या-
न्द्धावि ꣳशतिश्च ॥ ॥१॥

❋ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय

❋ अत्र अज्ञेयमूलमिमं मन्त्रमाधुनिकाः पठन्ति ।

Public domain. Digitization Muthulakshmi Research Acader

त्र्यम्बकायं त्रिपुरान्तकायं त्रिकालाग्निकालायं कालाग्निरुद्रायं नीलकण्ठायं मृत्युञ्जयायं सर्वेश्वरायं सदाशिवायं श्रीमन्महादेवाय नमः ॥

नमो हिरण्यबाहवे सेनान्यें दिशाञ्च पतयें नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतयें नमो नमं स्सस्पिञ्जराय त्विषीमते पथीनां पतयें नमोनमो बभ्लुशायं विव्याधिनेऽन्नानाम्पतयें नमो नमो हरिकेशायोपवीतिनें पुष्टानां पतयें नमो नमो भवस्य हेत्यै जगतां पतयें नमो नमो रुद्रायातताविने क्षेत्राणां पतयें नमोनमं स्सूतायाहन्त्यायवनानाम्पतयें नमोनमः[५] रोहिताय स्थपतयें वृक्षाणां पतयें नमो नमो मन्त्रिणें वाणिजाय कक्षाणां पतयें नमो नमो भुवन्तयें वारिवस्कृतायौषधीनां पतयें नमो नमं उच्चैर्घोषायाक्रन्दयते पत्तीनां पतयें नमो नमः कृत्स्नवीताय धावते सत्वनां पतयें नमः ॥ [६] वनानां पतयें नमो नम एकान्नत्रिंशच्च ॥ ॥२॥

नमो हन्तमानायनिव्याधिनं आव्याधिनीनांपतयें

Public domain. Digitization Muthulakshmi Research Acade

नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमस्सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचरायकुलुञ्चानाम्पतये नमो नमः [७] इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यश्शयानेभ्यश्च वो नमो नम स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नम स्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नम सभाभ्यस्सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ [८] कुलुञ्चानां पतये नमो नमोऽश्वपतिभ्यस्त्रीणि च ॥ ॥३॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो

Public domain. Digitization Muthulakshmi Research Acader

गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यः [९] रथपतिभ्यश्च वो नमो नम स्सेनाभ्य स्सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यस्सङ्ग्रहीतृभ्यश्च वो नमो नम स्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यश्वनिभ्यश्च वो नमो नम श्वभ्य श्वपतिभ्यश्चवोनमः॥[१०]रथेभ्यश्वपतिभ्यश्च द्वेच॥

नमो भवाय च रुद्राय च नमश्शर्वाय च पशुपतये च नमो नीलग्रीवायच शितिकण्ठायच नमः कपर्दिने च व्युप्तकेशाय च नमस्सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सँवृध्वने च [११] नमो

Public domain. Digitization Muthulakshmi Research Acade

अग्रियाय च प्रथमाय च नमः आशवे चाजिराय च नमः शीघ्रियायच शीभ्यायच नमः ऊर्म्याय चावस्वन्याय च नमस्स्रोतस्याय च द्वीप्याय च ॥ [१२] सँवृध्वनेच पञ्चविꣳशतिश्च ॥ ॥५॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजायचापरजायच नमो मध्यमाय चापगल्भायच नमो जघन्याय च बुध्नियाय च नमस्सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः उर्वर्याय च खल्याय च नमश्श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमश्श्रवायच प्रतिश्रवायच [१३] नमः आशुषेणाय चाशुरथायच नमश्शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिनेच कवचिनेच नमश्श्रुताय च श्रुतसेनाय च ॥ १४ ॥ प्रतिश्रवाय च पञ्चविꣳशतिश्च ॥ ॥६॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशायच नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमस्स्वा

Public domain. Digitization Muthulakshmi Research Acader

युधायं च सुधन्वने च नमस्स्रुत्याय च पथ्याय च नमः कात्याय च नीप्याय च नमस्सूद्याय च सरस्याय च नमो नाद्यायं च वैशन्तायं च [१५] नमः कूप्यायचावट्याय च नमो वर्ष्याय चावर्ष्यायं च नमो मेघ्यायच विद्युत्यायच नमं ईध्रियाय चातप्यायच नमो वात्याय च रेष्मियायच नमो वास्तव्याय च वास्तुपायं च ॥ [१६] वैशन्तायं च त्रिꣳशच्चं ॥ ॥७॥

नमस्सोमाय च रुद्रायं च नमस्ताम्रायं चारुणायंच नमश्शङ्गायं च पशुपतये च नमं उग्रायं च भीमायं च नमो अग्रेवधायं च दूरेवधायं च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शम्भवे च मयोभवे च नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च [१७] नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमं आतार्याय चालाद्याय च नमश्शष्प्यायच फेन्यायच नमस्सिकत्यायच प्रवाह्याय च ॥ [१८] शिवतराय च त्रिꣳशच्चं ॥ ॥८॥

Public domain. Digitization Muthulakshmi Research Acade

नमः इरिण्यायच प्रपथ्याय च नमः किꣳशिलायच क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः कात्याय च गह्वरेष्ठाय च नमो हृदय्याय च निवेष्याय च नमः पाꣳसव्याय च रजस्याय च नमꣳशुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च [१९] नमः ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नमः आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नमः आनिर्हतेभ्यो नमः आमीवत्केभ्यः ॥ [२०] उलप्याय च त्रयस्त्रिꣳशच्च ॥ ॥९॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणा मेषां पꣳशूनां माभेर्माऽरो मो एषा ङ्किञ्चनाममत् । या ते रुद्र शिवा तनूरशिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । इमाꣳरुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । यथा नः

Public domain. Digitization Muthulakshmi Research Acader

श्शमसंद् द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे अस्मिन् ।२१॥
अनातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छञ्च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ । मानो महान्तं मुत मानो अर्भकं मान उक्षन्त मुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मानस्तनुवः [२२] रुद्र रीरिषः । मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितोवधीर् हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नश्शर्म यच्छ द्विबर्हाः । स्तुहि ॥२३॥
श्रुतङ्गर्तसदँसुवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः । परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः । अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नस्सुमना भव । परमे वृक्ष आयुधन्निधाय कृत्तिवासा अहिंसन्नः पिनाकम्

Public domain. Digitization Muthulakshmi Research Acade

[२४] बिभ्रदागहि । विकिरिद्विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳहेतयोऽन्यमस्मन्निवपन्तु ताः । सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ [२५] अस्मिꣳस्तनुवंस्तुहिपिनाकमेकान्नत्रिꣳशत्वं ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि । अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । नीलग्रीवाश्शितिकण्ठा श्शर्वा अधः क्षमाचराः । नीलग्रीवाश्शितिकण्ठा दिवꣳरुद्रा उपश्रिताः । ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । ये पथां पथिरक्षय ऐलबृदायव्युधः । ये तीर्थानि [२६] प्रचरन्ति सृकावन्तो निषङ्गिणः । य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे । तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नँवातो वर्षमिषवस्तेभ्यो दशप्राची-

Public domain. Digitization Muthulakshmi Research Acader

र्दशंदक्षिणा दशंप्रतीची र्दशोदीची र्दशोर्ध्वा स्तेभ्यो नमस्तेनो मृडयन्तु ते यन्द्विष्मो यश्च नोद्वेष्टितँवो जंभे दधामि ॥ [२७] तीर्थानि यश्च षट्चं ॥ ॥११॥

नमस्तेरुद्र नमो हिरण्यबाहवे नमस्सहमानाय नमं आव्याधिनीभ्यो नमो भवाय नमो ज्येष्ठाय नमो दुन्दुभ्यांय नमस्सोमांय नमं इरिण्यांय द्रापे सहस्राण्येकादश ॥११॥ नमस्ते रुद्र नमो भवाय द्रापे सप्तविंशतिः ॥२७॥ नमस्ते रुद्र तँवो जंभे दधामि ॥

हरिः ओ (३) म् ॥

॥ रुद्रप्रश्नस्समाप्तः ॥

त्र्यम्बकँयजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥ ये तै सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वानव यजामहे॥ मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ ओन्नमो

Public domain. Digitization Muthulakshmi Research Acade

भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥ ओम् शान्तिश्शान्तिश्शान्तिः ॥

॥ श्रीः ॥

॥ ओन्नमः परमात्मने ॥

॥ अथ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमावर्धन्तु वाङ्गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्चमे ज्योतिश्चमे सुवश्च मे प्राणश्च मेऽपानः [१] च मे व्यानश्च मेऽसुश्च मे चित्तञ्चम आधीतञ्चमे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्चमे दक्षश्च मे बलञ्च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्चमे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे ॥ [२] अपानस्तनूश्च मेऽष्टादश च ॥ ॥१॥

Public domain. Digitization Muthulakshmi Research Acader

ज्यैष्ठ्यञ्च म आधिपत्यञ्च मे मन्युश्च मे मामश्च मेऽ-
मश्च मेऽम्भश्च मे जेमाचं मे महिमाचं मे वरिमा चं मे
प्रथिमाचं मे वर्ष्मा चं मे द्राघुयाचं मे वृद्धञ्च मे वृद्धिश्च
मे सत्यञ्च मे श्रद्धाचं मे जगच्च [३] मे धनञ्च मे वशश्च
मे त्विषिश्च मे क्रीडाचं मे मोदश्च मे जातञ्च मे जनि-
ष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे वित्तञ्च मे वेद्यञ्च मे
भूतञ्च मे भविष्यञ्च मे सुगञ्च मे सुपथञ्च म ऋद्धञ्च म
ऋद्धिश्च मे क्लृप्तञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च
मे ॥ [४] जगच्चर्द्धिश्चतुर्दश च ॥ ॥२॥

शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे
सौमनसश्च मे भद्रञ्च मे श्रेयश्च मे वस्यश्च मे यशश्च मे
भगश्च मे द्रविणञ्च मे यन्ताचं मे धर्ताचं मे क्ष्मेमश्च मे
धृतिश्च मे विश्वञ्च [५] मे महश्च मे सँविच्च मे ज्ञात्रञ्च मे
सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च म ऋतञ्च मेऽमृतञ्च
मेऽयक्ष्मञ्च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ्च
मेऽनमित्रञ्च मेऽभयञ्च मे सुगञ्च मे शयनञ्च मे सूषाचं मे
सुदिनञ्च मे ॥ [६] विश्वञ्च शयनमष्टौ चं ॥ ॥३॥

Public domain. Digitization Muthulakshmi Research Acade

ऊर्क्चं मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च म आऽद्ध्यञ्च मे यधश्च मे यज्ञश्च मे पुष्टञ्च मे पुष्टिश्च मे विभुचं [७] मे प्रभुचं मे बहुचं मे भूयश्च मे पूर्णञ्च मे पूर्णतरञ्च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नञ्च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ [८] विभुचं मसुराश्चतुर्दशच ॥ ॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे सीसञ्च मे त्रपुश्च मे श्यामञ्च मे लोहञ्च मेऽग्निश्च म आपश्चमे वीरुधश्च म ओषधयश्च मे कृष्टपच्यञ्च [९] मेऽकृष्टपच्यञ्च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्ताँवित्तंच मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे वसुंच मे वसतिश्च मे कर्मंच मे शक्तिश्च मेऽर्थश्चम एमश्चमऽइतिश्चमेगतिश्चमे॥[१०]कृष्टपच्यञ्चाष्टाचत्वारिंशच्च

Public domain. Digitization Muthulakshmi Research Acader

अग्निश्चम इन्द्रश्चमे सोमश्चम इन्द्रश्चमे सविताचम इन्द्रश्च मे सरस्वतीचम इन्द्रश्चमे पूषाचम इन्द्रश्चमे बृहस्पतिश्चम इन्द्रश्चमे मित्रश्चम इन्द्रश्चमे वरुणश्चम इन्द्रश्चमे त्वष्टाच [११] म इन्द्रश्च मे धाताचं म इन्द्रश्च मे विष्णुश्चम इन्द्रश्चमेऽश्विनौचम इन्द्रश्चमे मरुतश्चम इन्द्रश्चमे विश्वेचमे देवा इन्द्रश्चमे पृथिवीचम इन्द्रश्चमेऽन्तरिक्षञ्चम इन्द्रश्चमे द्यौश्चम इन्द्रश्चमे दिशश्चम इन्द्रश्चमे मूर्धाचम इन्द्रश्चमे प्रजापतिश्चम इन्द्रश्चमे॥[१२] त्वष्टा च द्यौश्चम एकंविꣳशतिश्च ॥ ॥६॥

अꣳशुश्चमे रश्मिश्च मे ऽदाभ्यश्च मेऽधिपतिश्चम उपाꣳशुश्च मेऽन्तर्यामश्चम ऐन्द्रवायवश्च मे मैत्रावरुणश्चम आश्विनश्च मे प्रतिप्रस्थानश्चमे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्चमे वैश्वानरश्च म ऋतुग्रहाश्च [१३] मेऽतिग्राह्याश्चम ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्चमे माहेन्द्रश्चम आदित्यश्चमे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्चमे ॥ [१४] ऋतुग्रहाश्च चतुस्त्रिꣳशच्च ॥

Public domain. Digitization Muthulakshmi Research Academy

इध्मश्चं मे बर्हिश्चं मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्चं मे ग्रावाणश्च मे स्वर्वश्चम उपरवाश्चं मेऽधिषवणेच मे द्रोणकलशश्चं मे वायव्यानिचमे पूतभृच्चम आधवनीयश्चम आग्नीध्रञ्चमे हविर्धानञ्चमे गृहाश्चं मे सदश्च मे पुरोडाशाश्च मे पचताश्चंमेऽवभृथश्चं मे स्वगाकारश्चं मे ॥ [१५] गृहाश्च षोडशच ॥८॥

अग्निश्चं मे घर्मश्चंमेऽर्कश्चंमे सूर्यश्चमे प्राणश्चं मेऽश्वमेधश्चं मे पृथिवीचमेऽदितिश्च मे दितिश्च मे द्यौश्चंमे शकरीरङ्गुलयो दिशश्चमे यज्ञेनं कल्पन्तामृक्चंमे साम च मे स्तोमश्च मे यजुश्च मे दीक्षाचं मे तपश्चम ऋतुश्चं मे व्रतञ्चमेऽहोरात्रयोर्वृष्ट्याबृहद्रथन्तरेचं मे यज्ञेनं कल्पेताम् ॥ [१६] दीक्षाऽष्टादश च ॥ ॥९॥

गर्भाश्च मे वत्साश्चं मे त्र्यविश्चमे त्र्यवीचंमे दित्यवाट्चं मे दित्यौहीचं मे पञ्चाविश्च मे पञ्चवीचं मे त्रिवत्सश्चं मे त्रिवत्साचं मे तुर्यवाट्चं मे तुर्यौहीचं मे पष्ठवाचंमे पष्ठौहीचंम उक्षाचंमे वशाचंम ऋषभश्चं[१७]

Public domain. Digitization Muthulakshmi Research Acader

मे वेहच्चमेऽनड्वाच्चं मे धेनुश्चंम आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पताँव्यानो यज्ञेन कल्पताञ्चक्षुर्यज्ञेन कल्पताꣳश्रोत्रंयँज्ञेन कल्पतां मनो यज्ञेन कल्पतावाँग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतायँज्ञोयज्ञेनकल्पताम् ॥ [१८] ऋषभश्चं चत्वारिꣳशच्चं॥

एकंच मे तिस्रश्चं मे पञ्चमे सप्तचंमे नवंचम एकादशचमे त्रयोदशचमे पञ्चदशचमेसप्तदशचमे नवंदशचम एकंविꣳशतिश्चमे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवंविꣳशतिश्चमं एकंत्रिꣳशच्चमे त्रयस्त्रिꣳशच्च [१९] मे चतस्रश्चमेऽष्टौ चं मे द्वादशच मे षोडशच मे विꣳशतिश्चंमे चतुर्विꣳशतिश्चमेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशचमे चत्वारिꣳशच्चमे चतुश्चत्वारिꣳशचमेऽष्टाचत्वारिꣳशच्चमे वाजश्च प्रसवश्चापिजश्चक्रतुश्च सुवंश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ [२०] त्रयस्त्रिꣳशच्च व्यश्निय एकादश च ॥

॥११॥

Public domain. Digitization Muthulakshmi Research Acade

अग्नाविष्णू ज्यैष्ठ्यꣳशञ्चोर्क्वाश्मा चाग्निश्चाꣳशु-
श्चेध्मश्चाग्निश्च घर्मोगर्भश्चैकाचैकादश ॥

इडादेवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिशꣳसि-
षद्विश्वेदेवास्सूक्तवाचः पृथिवि मातर्मामाहिꣳसीर्म-
धुमनिष्ये मधुजनिष्ये मधुवक्ष्यामि मधुवदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्य
स्तंमा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ओं शान्तिश्शान्तिश्शान्तिः ॥

॥ चमकप्रश्नस्समाप्तः ॥

॥ श्रीः ॥

॥ ओन्नमः परमात्मने ॥

॥ अथ पुरुषसूक्तम् ॥

सहस्रशीर्षापुरुषः । सहस्राक्षस्सहस्रपात् । सभू-
मिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुषएवे-
दꣳसर्वम् । यद्भूतयँच्चभव्यम् । उतामृतत्वस्येशानः ।
यदन्नेनातिरोहति । एतावानस्यमहिमा । अतोज्या-

Public domain. Digitization Muthulakshmi Research Acader

यां॑श्च पूरुषः। [१] पादो॑ऽस्य॒ विश्वा॑भूतानि॑। त्रि॒पा॒-
दस्या॒मृतं॑ दि॒वि। त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः। पादो॑स्ये॒-
हाभ॑वा॒त्पुनः॑। ततो॒ विष्व॒ङ्व्य॑क्रामत्। सा॒श॒ना॒न॒श॒ने
अ॒भि। तस्मा॒द्विरा॑डजायत। वि॒राजो॒ अधि॒ पूरु॑षः।
स॒जा॒तो अ॒त्य॑रिच्यत। प॒श्चाद्भूमि॒मथो॑ पुरः। [२]
यत्पुरु॑षेण ह॒विषा॑। दे॒वा य॒ज्ञम॑तन्वत। व॒स॒न्तो अ॑स्या-
सी॒दाज्य॑म्। ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः। स॒प्तास्या॑स॒न्परि॒-
धय॑ः। त्रिस्स॒प्त स॒मिध॑ः कृ॒ताः। दे॒वा य॒ज्ञं त॑न्वा॒नाः।
अब॑ध्न॒न्पुरु॑षं प॒शुम्। तं य॒ज्ञं ब॒र्हि॒षि प्रौ॒क्ष॒न्। पुरु॑ष॒-
ञ्जा॒तम॑ग्र॒तः। [३] तेन॑ दे॒वा अ॑यजन्त। सा॒ध्या ऋष॑-
य॒श्च॒ ये। तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॑तः। सम्भृ॑तं पृषदा॒ज्यम्।
प॒शूं॑स्ताꣳश्चक्रे वायव्या॒न्। आ॒र॒ण्या॒न्ग्रा॒म्याश्च॒ ये।
तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॑तः। ऋचस्सामा॑नि जज्ञिरे। छन्दा॑-
ꣳसि जज्ञिरे॒ तस्मा॑त्। यजु॒स्तस्मा॑दजायत। [४] त॒-
स्मा॒दश्वा॑ अजायन्त। ये के चो॑भ॒या॒द॑तः। गावो॑ ह ज॒-
ज्ञि॒रे॒ तस्मा॑त्। तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः। यत्पुरु॑षं॒ व्य॑दधुः।
क॒ति॒धा व्य॑कल्पयन्। मुख॒ङ्किम॑स्य॒ कौ बा॒हू। कावूरू

Public domain. Digitization Muthulakshmi Research Acade

पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहूराजन्यः कृतः । [५] ऊरूतदस्य यद्वैश्यः । पद्भ्याꣳशूद्रो अजायत । चन्द्रमामनसोजातः । चक्षोस्सूर्योऽजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णोद्यौस्समवर्तत । पद्भ्यांभूमिर्दिशश्श्रोत्रात् । तथालोकाꣳअकल्पयन् । [६] वेदाहमेतं पुरुषंमहान्तम् । आदित्यवर्णं तमसस्तुपारे । सर्वाणिरूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रःप्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । तेह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः ॥ [७] पूरुषःपुरोऽयतोऽजायत कृतोऽकल्पयन्नासन्द्वेचं ॥१॥

अद्भ्यस्सम्भूतःपृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्यत्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं

Public domain. Digitization Muthulakshmi Research Acader

तमसः परस्तात् । तमेवं विद्वान्मृत इह भवति । नान्यः पन्था विद्यतेयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । [८] तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वोयो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवाअसन्वशे । ह्रीश्चतेलक्ष्मीश्चपत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौव्यात्तम् । इष्टंमनिषाण । अमुंमनिषाण । सर्वंमनिषाण ॥ [९] जायते वशे सप्तच ॥ ॥२॥

तच्छँयोरावृणीमहे । गातुँयज्ञाय । गातुँयज्ञपतये । दैवीस्वस्तिरस्तुनः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वञ्जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे ॥

ओम् शान्तिश्शान्तिश्शान्तिः ॥

Public domain. Digitization Muthulakshmi Research Academy

सहस्रशीर्षन्देवँविश्वाक्षँविश्वशंम्भुवम्। विश्वन्नारायणन्देवमक्षरँपरमं पदम् । विश्वतःपरमान्नित्यं विश्वन्नारायणꣳहरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरꣳशाश्वतꣳशिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरंब्रह्म तत्त्वन्नारायणःपरः । नारायणपरोध्याताध्यानन्नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । [१] अन्तर्बहिश्चतत्सर्वं व्याप्य नारायणस्स्थितः । अनन्तमव्ययङ्कविꣳसमुद्रेऽन्तंविश्वशंम्भुवम् । पद्मकोशप्रतीकाशꣳहृदयञ्चाप्यधोमुखम् । अधोनिष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलंभातीविश्वस्यायतनंमहत् । सन्ततꣳशिलाभिस्तुलम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳसूक्ष्मन्तस्मिन्त्सर्वंप्रतिष्ठितम् । तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरःकविः । तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वन्देह-

Public domain. Digitization Muthulakshmi Research Acader

मापादतलमस्तगः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वाव्यवस्थितः। नीलतोयदमध्यस्था द्विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः। सब्रह्म स शिवस्सहरिस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥ [२] अपि वा सन्तता षट्चं॥

ऋतꣳसत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमोनमः॥

नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

विष्णोर्नुकं वीर्याणि प्रवोचं यःपार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳसधस्थँविचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोःपृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवेत्वा॥

॥ इति पुरुषसूक्तम् ॥

Public domain. Digitization Muthulakshmi Research Acade

॥ श्रीः ॥

॥ ओम्नमः परमात्मने ॥

॥ शान्तिपञ्चकप्रारम्भः ॥

शन्नोमित्रश्शँवरुणः । शन्नोभवत्वर्यमा । शन्नइन्द्रो बृहस्पतिः । शन्नोविष्णुरुरुक्रमः । नमोब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतंवदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतुमाम् । अवतुवक्तारम् ।

ओं शान्तिश्शान्तिश्शान्तिः ॥

शन्नोमित्रश्शँवरुणः । शन्नोभवत्वर्यमा । शन्नइन्द्रो बृहस्पतिः । शन्नोविष्णुरुरुक्रमः । नमोब्रह्मणे । नमस्ते वायो । त्वमेवप्रत्यक्षंब्रह्मासि । त्वामेवप्रत्यक्षंब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ।

ओम् शान्तिश्शान्तिश्शान्तिः ॥

सहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै ।

ओम् शान्तिश्शान्तिश्शान्तिः ॥

Public domain. Digitization Muthulakshmi Research Acader

नमोवाचेयाचोदिता याचानुदिता तस्यैवाचेनमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतोमन्त्रपतीन्परादाँवैश्वदेवीवाँचमुद्यासꣳ शिवामदंस्ताञ्जुष्टान्देवेभ्यश्शर्म मेद्यौश्शर्म पृथिवीशर्मविश्वमिदञ्जगत् । शर्मचन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतँवदिष्ये भुवनवँदिष्ये तेजोवदिष्ये यशोवदिष्ये तपोवदिष्ये ब्रह्मवदिष्ये सत्यँवदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृणउपस्तरणंमे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनांभूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौमामाहासिष्टं मधुमनिष्ये मधुजनिष्ये मधुवक्ष्यामि मधुवदिष्यामि मधुमतीन्देवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्यस्तां मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ।

ओम् शान्तिश्शान्तिश्शान्तिः ॥

तच्छँयोरावृणीमहे । गातुँयज्ञायं । गातुँयज्ञपतये । दैवीस्वस्तिरस्तुनः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वञ्जिगातु

Public domain. Digitization Muthulakshmi Research Acade

भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे ।
ओम् शान्तिश्शान्तिश्शान्तिः ॥
॥ इति शान्तिपञ्चकम् ॥

॥ श्रीः ॥
॥ ओन्नमः परमात्मने ॥
॥ अथ श्रीसूक्तम् ॥

हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य आनन्द-कर्दमचिक्लीतेन्दिरासुता ऋषयः । आद्यास्तिस्रोऽनुष्टुभः । चतुर्थी बृहती । पञ्चमीषष्ठ्यौ त्रिष्टुभौ । ततोऽष्टावनुष्टुभः । अन्त्या प्रस्तारपंक्तिः । श्रीर्देवता । महालक्ष्मीप्रसादसिध्यर्थे जपे विनियोगः ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयङ्गामश्वं पुरुषानहम् ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियन्देवीमुपह्वये श्रीर्मादेवीर्जुष-

Public domain. Digitization Muthulakshmi Research Acader

ताम् ॥ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ चन्द्रां प्रभासाँयशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मी मै नश्यतां त्वां वृणे ॥१॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तववृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीन्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम् ॥ मनसःकाममाकूतिं वाचस्सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीश्श्रयतांयशः ॥ ॥२॥

कर्दमेन प्रजाभूता मयि सम्भवकर्दम । श्रियंवासयमे कुले मातरं पद्ममालिनीम् ॥ आपस्सृजन्तु स्नि-

Public domain. Digitization Muthulakshmi Research Acade

ग्धानि चिक्लीतवसमेगृहे । निचं देवीं मातरं श्रियं वासयं मे कुले ॥ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥ आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतङ्गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥

यश्शुचिःप्रयतोभूत्वा जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चञ्चश्रीकामस्सततञ्जपेत् ॥ पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे । तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥ अश्वदायीं गोदायी धनदायी महाधने । धनं मे जुषतान्देवि सर्वकामांश्च देहि मे ॥ पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ पुत्रपौत्रधनन्धान्यं हस्त्यश्वादिगवेरथम् । प्रजानां भवसी माता आयुष्मन्तङ्करोतु मे ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्व-

Public domain. Digitization Muthulakshmi Research Acader

रुणं धनमस्तुते ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा। सोमंधनस्यसोमिनोमह्यंददातुसोमिनः॥ नक्रोधोनचं मात्सर्यं न लोभो नाशुभामतिः। भवन्तिकृतंपुण्यानां भक्तानां श्रीसूक्तञ्जपेत् ॥ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ विष्णुपत्नीं क्षमान्देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीन्नमाम्यच्युतवल्लभाम्॥ महालक्ष्मीचंविद्महेविष्णु-पत्नीचं धीमहि। तन्नोलक्ष्मीः प्रचोदयात्॥ श्रीवर्चस्व मायुष्यमारोग्यमाविंधा च्छोभमानं महीयतें। धान्यं धनं पशुं बहुपुत्रलाभं शतसंवँथ्सरं दीर्घमायुः ॥

श्रीसूक्तं समाप्तम् ॥

॥ श्रीः ॥

॥ ओन्नमःपरमात्मत्ने ॥

॥ अथ भूसूक्तम् ॥

भूमिर्भूम्नाद्यौर्वरिणाऽन्तरिक्षं महित्वा। उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे। आऽयङ्गौःपृश्नि-

Public domain. Digitization Muthulakshmi Research Academy

रक्रमीदसंनन्मातरं पुनः। पितरञ्च प्रयन्थ्सुवः। त्रिः शद्धामविराजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्यवह द्युभिः। अस्यप्राणादपानत्यन्तश्चरति रोचना। व्यक्ख्यन्महिषस्सुवः। यत्वाक्रुद्धः परोवपमन्युनायदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे। आदित्याविश्वे तद्देवा वसवश्च समाभरन्। मनोज्योतिर्जुषतामाज्यँविच्छिन्नँयज्ञꣳसमिमन्दधातु। बृहस्पतिस्तनुतामिमन्नो विश्वेदेवा इहमादयन्ताम्॥

मेदिनीदेवी वसुन्धरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणां श्रोत्रञ्चक्षुर्मनः॥ देवी हिरण्यगर्भिणी देवी प्रसोदरी। रसने सत्यायने सीद॥ समुद्रवती सावित्रीहनो देवी मह्यकी। महाधरणी महोऽर्यतिस्थ॥ भृङ्गेभृङ्गे यज्ञेयज्ञे विभीषणी। इन्द्रपत्नी व्याजनी सुरसितइह॥ वायुपरी जलशयनी स्वयन्धारा सत्यन्धोपरि मेदिनी। सोपरिधत्तङ्गाय॥ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मी-

Public domain. Digitization Muthulakshmi Research Acader

प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ धनुर्धरायै विद्महे सर्वसिध्यैच धीमहि । तन्नो धरा प्रचोदयात् ॥ इक्षुशालियवसस्यफलाढ्यां पारिजाततरुशोभितमूले । स्वर्णरत्नमणिमण्टपमध्ये चिन्तयेत् सकललोकधरित्रीम् ॥ श्यामां विचित्रां नवरत्नभूषितां चतुर्भुजां तुङ्गपयोधरान्विताम् । इन्दीवराक्षीं नवशालिमञ्जरीं शुकं दधानां वसुधां भजामहे ॥ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रासखाय स्सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥

॥ अथ दुर्गासूक्तम् ॥

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । सनःपर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गांदेवीं शरणमहं प्रपद्ये सुतरसितरसे नमः ॥ अग्ने त्वं पारयानव्यो अस्मान्थ्स्वस्तिभिरतिदुर्गाणि विश्वा । पूश्च पृथ्वीबहुलान उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानिनो दुर्गहा जात-

Public domain. Digitization Muthulakshmi Research Acade

वेदस्सिन्धुन्नावा दुरितातिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतनाजितꣳसहमानमुग्रमग्निꣳहुवेम परमात्सधस्थात् । स नः पर्षदतिदुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः ॥ प्रतोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजोनिषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम । नाकस्य पृष्ठमभिसँवसानो वैष्णवीं लोक इहमादयन्ताम् ॥ दुरितात्यग्निश्चत्वारिंच ॥

॥ अथ श्रीरुद्रकवचम् ॥

अस्य श्रीरुद्रकवचस्तोत्रमहामन्त्रस्य । दूर्वासा ऋषिः । अनुष्टुप्छन्दः । त्र्यम्बकरुद्रो देवता । ह्रीं बीजम् । श्रीं शक्तिः । ह्रीं कीलकम् । मम मानसाभीष्टसिध्यर्थे जपे विनियोगः ॥ ह्रामित्यादिषड्भिर्दीर्घैष्षडङ्गन्यासः ॥ ध्यानम् ॥ शान्तं+नमामि ॥ दूर्वासा उवाच । प्रणम्य शिरसा देवं स्वयम्भूः परमेश्वरम् । एकं सर्वगतं देवं सर्वदेवमयं विभुम् ॥ १ ॥

Public domain. Digitization Muthulakshmi Research Acader

रुद्रवर्म प्रवक्ष्यामि अङ्गप्राणस्य रक्षये । अहोरात्रमयं देवं रक्षार्थं निर्मितं पुरा ॥ २ ॥ रुद्रो मे चाग्रतः पातु पातु पार्श्वौ हरस्तथा । शिरो म ईश्वरः पातु ललाटं नीललोहितः ॥३॥ नेत्रे मे त्र्यम्बकः पातु मुखं पातु महेश्वरः । कर्णयोः पातु मे शम्भुर्नासिकायां सदाशिवः ॥४॥ वागीशः पातु मे जिह्वामोष्ठौ पात्वम्बिकापतिः । श्रीकण्ठः पातु मे ग्रीवां बाहूचैव पिनाकधृत् ॥५॥ हृदयं मे महादेव ईश्वरोऽव्यात्तनान्तरम् । नाभिं कुक्षिञ्च वक्षश्च पातु शर्व उमापतिः ॥६॥ बाह्वभ्यान्तरञ्चैव सूक्ष्मरूपस्सदाशिवः । शर्वो रक्षतु नः सर्वगात्राणि च यथाक्रमम् ॥७॥ वज्रशक्तिधरश्चैव [illegible]शधस्तथा । खड्गशूलधरो नित्यं रक्षतु त्रिदशेश्वरः ॥८॥ प्रासादेषु पदेचैव वृक्षमूले नदीतटे । सन्ध्यायां राजभवने विरूपाक्षस्तु पातु माम् ॥ ९ ॥ शीतोष्णातपयुत्मेषु तुहिनद्रुमकण्टके । निर्मानुष्येऽस्मे मार्गे वाहि मां वृषभध्वज ॥ १० ॥ इत्येतद्रुद्रकवचं पवित्रं पापनाशनम् । महादेवप्रसादेन दू-

Public domain. Digitization Muthulakshmi Research Acade

वासोमुनिकल्पितम् ॥११॥ ममाख्यातं समासेन न भयं तेन विंदति । प्राप्नोति परमारोग्यं पुण्यमायुष्य वर्धनम् ॥१२॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । कन्यार्थी लभते कन्यां न भयं विद्यते क्वचित् ॥ ॥१३॥ अपुत्रो लभते पुत्रं मोक्षार्थी मोक्षमाप्नुयात् । त्राहि त्राहि महादेव त्राहि त्राहि त्रयीमय ॥ १४ ॥ त्राहि मां पार्वतीनाथ त्राहि मां त्रिपुरान्तक । पाशं खट्वाङ्गदिव्यास्त्रे त्रिशूलं रौद्रमेव च ॥१५॥ नमस्करोमि देवेश त्राहि मां जगदीश्वर । शत्रुमध्ये सभामध्ये ग्राममध्ये गृहांतरे ॥ १६ ॥ गमने गमने चैव त्राहि मां भक्तवत्सल । त्वंचित्त्वमादिमश्चैव त्वंसाद्धिस्त्वं परायणम् ॥ १७ ॥ कर्माणि च मनो । ह्रीं बुद्धिश्च सदा भव । सर्वशत्रुजयप्राप्तिस्सर्वव्याधिनिवारणम् ॥१८॥

ज्वरभयं छिन्धि सर्वज्वरभयं छिन्धि सर्वग्रहभयं छिन्धि सर्वग्रहभयं छिन्धि । रुद्रलोकं स गच्छति रुद्रलोकं स गच्छति रुद्रलोकं स गच्छत्योन्नम इति ॥

Public domain. Digitization Muthulakshmi Research Acader

Public domain. Digitization Muthulakshmi Research Acade